# A-II/1/1410/21

## तृतीयसत्रार्द्धम्

## प्रथमपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. का नाम जातिः?
2. अपोहवादस्य स्वरूपं किम्?
3. को नाम व्यवहारः?
4. बौद्धमते आत्मपदार्थः कः?
5. कर्मक्षयः कथं साध्यः?
6. 'वह्निर्दहति नाकाशम्' कुतः?
7. जातिशाक्तिवादिनां मते लाघवं कथं कुत्र च?
8. मिथ्याज्ञानं किं रूपम्?
9. 'जातिविशिष्टा व्यक्तिः' इति पक्षे का अनुपपत्तिः?
10. वासना पदार्थः वर्णनीयः?
11. 'तिक्तो मधुरः' इत्यादि प्रयोगः कदा सम्भाव्यते?

**अथवा**

सामानाधिकरण्यं किं रूपम्?

12. जातिव्यक्त्योः सम्बन्धः कीदृशः?

**अथवा**

शब्दः द्रव्यमिति के वदन्ति गुण इति के वदन्ति?

13. प्राभाकराः अभावं किं वदन्ति?

**अथवा**

स्वर्गः सुखविशेषः इति कथं साध्यते?

14. चित्राक्षेपवादस्य कः आशयः?

**अथवा**

आत्मवादस्य कः विषयः?

15. यज्ञायुधी शब्दार्थः वर्ण्यताम्।

**अथवा**

मीमांसकसम्मतः आत्मा किं रूपः?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. आकृतिवादं निरूपयत।

17. अपोहवादमनूद्य खण्डयत।

**अथवा**

"नियतशक्तयो हि शब्दाः" इमां पङ्क्तिं व्याख्यात।

18. सृष्टिविषये मीमांसकानां कोऽभिप्रायः?

**अथवा**

चित्रादिवाक्यानामप्रामाण्यं प्रामाण्यं वेति विमृशत।

19. शरीरात्मवादिनां मतं निरूप्य खण्डयत।

20. आत्मस्वरूपं विवेचयत।

**अथवा**

मोक्षार्थिनः स्वरूपं परिशीलयत।

**स. एकस्य निबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. दर्शनप्रपञ्चे श्लोकवार्त्तिकस्य प्रतिष्ठां वर्णयत।

**अथवा**

वनवादं निरूण्य मीमांसासिद्धान्तं प्रतिपादयत।

**अथवा**

शब्दार्थयोः सम्बन्धं विवेचयत।

# A-II/2/1411/21

## तृतीयसत्रार्द्धम्

## द्वितीयपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. मीमांसाकौस्तुभस्य रचयिता कः?
2. मीमांसाकौस्तुभस्य मङ्गलश्लोकं लिखत।
3. अवान्तरप्रकरणस्य उदाहरणं किम्?
4. अभिक्रमणं कस्याङ्गम्?

**अथवा**

सप्तदशारत्निर्वाजपेयस्य यूपो भवतीति वाक्यस्य कोऽर्थः?

5. दर्शपूर्णमासयोः सामिधेनीविधिवाक्यं लिखत।
6. अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यादिति सूत्रार्थं लिखत।

**अथवा**

चमसाधिकरणे कः संशयः?

7. अथातः शेषलक्षणमित्यत्र अथशब्दस्य कोऽर्थः?
8. शेषः परार्थत्वादिति सूत्रेण किमुच्यते?
9. फलं च पुरुषार्थत्वादिति सूत्रार्थं लिखत।

**अथवा**

पुरुषश्च कर्मार्थत्वादिति सूत्रस्य कोऽर्थः?

10. स्फ्याधिकरणसंशयं लिखत।
11. "एतानि वै दश यज्ञायुधानि" इत्यस्य वाक्यस्य कोऽर्थः?

**अथवा**

आग्नेयशब्देन अग्नीषोमीयः कुतो न ग्राह्यः?

12. यज्ञायुधवाक्यस्य सिद्धान्ते किं प्रयोजनम्?

**अथवा**

बर्हिर्देवसदनं दामीति मन्त्रस्य कोऽर्थः?

13. अवघातः यवेषु कथं प्राप्नोति?

14. सूक्तवाकस्य विनियोजकं वाक्यं किम्?

15. हविष्कृदेहीति त्रिखघ्नन्नाह्वयतीति वाक्यस्य अर्थं लिखत।

**ब. एतेषां प्रश्नानां लघूनि उत्तराणि लिखत। (5×6=30)**

16. बादरिजैमिनिमतेन शेषत्वलक्ष्याणि कानीति प्रतिपादयत।

17. अरुणाधिकरणविषयवाक्यार्थं विमृशत।

**अथवा**

बहुव्रीहेः अन्यपदार्थे शक्तिः स्वीकार्या न वेति विचारयत।

18. सूक्तवाकाधिकरणमारचयत।

**अथवा**

अग्नीषोमीयस्य आग्नेयपदवाच्यत्वाभावं साधयत।

19. स्फ्याधिकरणमारचयत।

**अथवा**

विशिष्टोद्देशे कथं वाक्यभेद इति विचारयत।

20. अर्थाधिकरणं संक्षेपेण उपस्थापयत।

**स. एकस्य प्रश्नस्य दीर्घमुत्तरं लिखत। (1×20=20)**

21. तृतीयाध्यायसङ्गतिमुपवर्ण्य शेषलक्षणं, तल्लक्ष्याणि च कानि इति विचारयत।

**अथवा**

उपवीताधिकरणमारचयत।

**अथवा**

गुणानां च परार्थत्वादिति सूत्रार्थं भाष्यकारमतेन सोदाहरणं विशदीकुरुत।

# A-II/3/1412/21

## तृतीयसत्रार्द्धम्

## तृतीयपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. कः अक्ष्यनुज्ञा विधिः?
2. कीदृशं कर्म तामसमिति कथ्यते।
3. श्येनस्य धर्मत्वं कथमुपपाद्यते?
4. धर्मब्रह्ममीमांसयोः भेदः कथं निश्चीयते?
5. लिङ्गादिज्ञानस्य प्रवृत्तौ कथमुपयोगः?
6. अनन्यलभ्यः शब्दार्थः इति न्यायस्य आशयः कः?
7. निमन्त्रणपदार्थः कः?
8. स्तोकं पचतीत्यत्र द्वितीयायाः कोऽर्थः?
9. 'पशुना' इत्यादौ लिङ्गसंख्योरन्वयः कुत्र?
10. स्वर्गः ऐहिकः उत आमुष्मिक इति सप्रमाणं लिखत।
11. मण्डनमिश्राः लिङाद्यर्थं किमाहुः?

**अथवा**

शाब्दीभावनायाः अंशत्रयं प्रदर्शयत।

12. किं नाम प्रशस्तत्वम्?

**अथवा**

प्राशस्त्यादेः अन्वयप्रकारः कः?

13. 'यजमानः प्रस्तरः' इत्यादौ कथमन्वयः?

**अथवा**

सामानाधिकरण्यस्वरूपं प्रदर्शयत।

14. चैत्रेण सुप्यते इत्यादौ शब्दबोधक्रमः कः?

**अथवा**

भावनामुख्यविशेष्यत्वं नाम किम्?

15. 'भावप्रधानमाख्यातम्' इत्यस्य अभिप्रायः कः?

**अथवा**

नैयायिकाः कस्य मुख्यविशेष्यत्वमङ्गीकुर्वन्ति?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. धर्मलक्षणं ग्रन्थरीत्या परिष्कुरुत।

17. तार्किकसम्मतलिङर्थं निराकुरुत।

**अथवा**

प्राशस्त्यादेः अन्वयप्रकारं दर्शयत।

18. श्येनस्य धर्मत्वमुत अधर्मत्वमिति विवेचयत।

**अथवा**

प्रेरणावादे पाणिनिमतं व्याख्यात।

19. बलवदनिष्टाननुबन्धित्वस्य लिङर्थत्वं निराकुरुत।

**अथवा**

निषेधवाक्येषु लिङर्थं निरूपयत।

20. आख्यातलक्ष्ये कर्तरि संख्यान्वयप्रकारं दर्शयत।

**स. एकस्य निबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. विध्यर्थनिरूपणम्।

**अथवा**

धर्माधर्मौ।

**अथवा**

भावनामुख्यविशेष्यकशब्दबोधनिरूपणम्।

# A-II/4/1413/21

## तृतीयसत्रार्द्धम्

## चतुर्थपत्रम्

## मीमांसा

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे प्रश्ना: समाधेया: ।** **(15×2=30)**

1. सप्तसोमसंस्था: लिखत।
2. प्रथमसूत्रगताथशब्दार्थ: क:?
3. प्रात: इत्यस्यार्थम् आश्वलायनाचार्य: किमाह?
4. क: राजन्य:?
5. के पूतीका:? के च कूला:?
6. व्रीहीनवहन्तीत्यत्र अवघात: कुत: नियम्यते?
7. अनुमार्जनं कदा कर्तव्यम्?
8. वेदिनिष्पत्तिस्वरूपं प्रदर्शयत।
9. कति प्रयाजा:? के च ते?
10. उपसमस्यतीति कस्मिन्नर्थे शब्दोऽयं प्रयुज्यते?
11. उपदेशातिदेशयो: को भेद:?

**अथवा**

के निगदा:? कुत्र तेषामन्तर्भाव:?

12. अध्वर्यु: केन वेदन सम्बद्ध:?

**अथवा**

कल्पसूत्रपदार्थं स्पष्टीकुरुत।

13. त्रय: श्रौताग्नय: के?

**अथवा**

किं नाम प्रतिपत्तिकर्म? किमुदाहरणम्?

14. पूर्णमास्यां विद्यमानाः प्रधानयागाः के ?

**अथवा**

अनड्वानशब्दस्य व्युत्पत्तिं प्रदर्शयत।

15. उत्करः इति कस्य संज्ञा ?

**अथवा**

किं नाम परिवासनम् ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. परिधिस्वरूपं वर्णयत।

17. वेद्यादिषु कालक्रमस्वरूपं व्यवस्थापयत।

**अथवा**

पिण्डपितृयज्ञस्य स्वरूपविवेचनं कुरुत।

18. तत्र गाहयत्यशब्दो लुप्यते संस्कारप्रतिषेधात्। व्याख्यात।

19. चत्वारः ऋत्विजः। वर्णयत।

**अथवा**

सङ्कल्पस्वरूपविवेकः।

20. मन्त्राणां प्रामाण्यं स्थापयत।

**अथवा**

परिसंख्याविधिं विवेचयत।

**स. एकस्य विवरणात्मकमुत्तरं लिखत।** **(1×20=20)**

21. दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत।

**अथवा**

श्रौतसूत्राणां वैशिष्ट्यम्।

**अथवा**

विद्यास्थानानि।

# A-II/5/1414/21

## तृतीयसत्रार्द्धम्

## पञ्चमपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. शबरस्वामी कं ग्रन्थं चकार ?

2. न्यायरत्नाकरः कस्य व्याख्या ?

3. सङ्कर्षकाण्डे कति अध्यायाः ?

4. नयविवेकः कस्य कृतिः ?

**अथवा**

मानमेयोदयकारौ कौ ?

5. द्वौ वेदभाष्यकारौ निर्दिशत।

**अथवा**

द्वौ श्रौतसूत्रकारौ निर्दिशत।

6. भवदेवस्य ग्रन्थः कः ?

**अथवा**

मीमांसायां केषु अध्यायेषु चत्वारः पादाः ?

7. शास्त्रदीपिकाया व्याख्याद्वयं निर्दिशत।

8. आपदेवः कस्मिन् देशे बभूव ?

9. उम्वेकभट्टस्य कृतिः का ?

**अथवा**

सुचरितमिश्रस्य कृतिः का ?

10. भावनाविवेकः केन रचितः ?

**अथवा**

विधिविवेकस्य रचयिता कः ?

11. प्रभाकरस्य कृतयः काः ?

12. न्यायमालाकारः कं देशमलञ्चकार ?

13. मीमांसासूत्राणि कने रचितानि ?

14. भवदासेन किं रचितम् ?

15. अङ्गत्वनिरुक्तिः केन प्रणीता ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. कुमारिलभट्टस्य कालविचारं प्रस्तुवत।

**अथवा**

शबरस्वामिनः इतिहासं वैशिष्ट्यं च विवृणुत।

17. विधिरसायनग्रन्थं परिचाययत।

**अथवा**

वाचस्पतिमिश्रं परिचाययत।

18. मीमांसाशास्त्रस्य दशग्रन्थान् तद्रचयितॄंश्च निर्दिशत।

19. भट्टसोमेश्वरस्य इतिहासं योगदानं च वर्णयत।

**अथवा**

प्रभाकरगुरोः इतिहासं लिखत।

20. मीमांसासूत्राणां शैलीं वर्णयत।

**स. एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. मीमांसाशास्त्रपरम्परां वर्णयत।

**अथवा**

वार्तिकस्य व्याख्यानानां परिचयं वैशिष्ट्यं च लिखत।

**अथवा**

खण्डदेवाचार्यमधिकृत्य निबन्धमेकं रचयत।